त्वात्। क्रौञ्चे वके शब्दरत्ना० स्त्रियां ङीष्।

**कालीची** स्त्री काल्या यमभगिन्या चीयते ऽत्र—चि—बा० आधारे ड गौरा० ङीष्। यमविचारभूमौ त्रिका०।

**कालीतनय** पुंस्त्री० कालीमितः प्राप्तोनयः प्रापणं यस्य। महिषे हेमच० स्त्रियां ङीष्। महिषस्य काल्यै बलिदानार्थं नीयमानत्वात्तथात्वम्। [चन्दने शब्दच०।

**कालीय** न० कालस्थाने भवम् "वृद्धाच्छः" पा० छ। कृष्ण-

**कालीयक** न० कालीयमिव कायति—कै—क। कालानुसार्य्ये सुगन्धिकाष्ठे (कलम्बक) अमरः।

**कालेय** पु० कालयाअपत्यम् ढक्। १दैत्यभेदे, कालकेये, कलायै १७८८पृ०दर्शितरक्तधारिण्यै हितं ढक्। २यकृति कं सुखमालेयमादेयं यस्मात्। ३कालचन्दने न० "आम्यानकालेयकृताङ्गरागाम्" कुमा०। कलिना दृष्टं साम ढक्। ४कलिदृष्टे सामभेदे तच्च माध्यन्दिनसवने सप्तमं सूक्तमधिकृत्य गेयम्। तत्प्रकार ऊहगाने दृश्यः

**कालेयक** पुंस्त्री० कलये विरोधाय साधु कलि+ढक् संज्ञायां क। १कुक्कुरे तस्यान्योन्यविरोधित्वात् तथात्वम् स्त्रियां ङीष्। कालेय+स्वार्थे संज्ञायां वा क। २कालीयचन्दने "मधुकरकुलकलङ्ककालीकृतकालेयककुसुमकुट्मलेषु" कादं०। ३हरिद्रायां पु० ४दारुहरिद्रायां न०राजनि०। तत्रार्थे पु० शब्दर०।

**कालेश** पु० ६त०। १सूर्य्ये तस्य स्वगत्या कालप्रवर्त्तकत्वात् तथात्वम्। २शिवे च। ३मकारवर्णे। "विष्णुरीशस्ततोहान्तः कालेशः पृथिवी ततः" श्रीविद्यामन्त्रोद्धारे "कालेशोमकारः" तन्त्रसा०। कालेश्वरादयोऽप्यत्र।

**कालोदक** न० भारतप्रसिद्धे तीर्थभेदे। "कालोदकं नन्दिकुण्डं तथा चोत्तरमानसम्" भा० आनु०२५अ०।

**काल्प** पु० कल्पे विधौ भवः अण्। (काँचाहलुद्) कर्च्चुरे शब्दर०। स्वार्थे क। तत्रार्थे अमरः।

**काल्पनिक** त्रि० कल्पनायाः आगतः ठञ्। कल्पनाभवे १कल्पिते, २ आरोपिते, च। स्त्रियां ङीप्। "इति व्युत्पत्तिस्तु काल्पनिकी" ति०त०।

**काल्पसूत्र** त्रि० कल्पसूत्रं वेत्त्यधीते वा सूत्रान्तत्वात् ठकि प्राप्ते "अकल्पादेः" इत्युक्तेः अण्। १कल्पसूत्राभिज्ञे २तदध्येतरि च स्त्रियां ङीप्। [विधानादौ।

**काल्पिक** त्रि० कल्पग्रन्थे उक्तः ठञ्। वेदाङ्गकल्पग्रन्थोक्ते

**काल्य** न० कल्यमेव स्वार्थे अण्। १प्रत्यूषे हेमच०। कालः-प्राप्तोऽस्य यत्। २प्राप्तकाले शीतादौ त्रि०। काले भवः दिगा० यत्। ३कालभवे त्रि० तदन्तसमासे अकर्म्मधारये उत्तरपदस्य आद्युदात्तता। ततोनडा० पाठान्तरे गोत्रे फक्। काल्यायन काल्यगोत्रापत्ये पु० स्त्री। [शब्दर०।

**काल्यक** न० काले साधु यत् स्वार्थे क। कर्चुरे (काँचाहलुद्)

**काल्या** स्त्री कालः गर्भग्रहणकालः प्राप्तोऽस्याः यत्। प्राप्तगर्भग्रहणयोग्यकालायाम् ऋतुमत्याम् अमरः "उपसर्य्या काल्याप्रजने" पा०। [भावे।

**काल्याणक** न० कल्याणस्य भावः मनोज्ञा० वुञ्। कल्याण-

**काव** न० कविर्द्देवताऽस्य अण्। कविदेवताके सामभेदे। तच्च तृतीयसवने गेयार्भवपवमानान्तर्गतम्। "आभीप्रियाणीति" सूक्ते गेयम्। तत्प्रकारश्च ऊहगाने दर्शितः।

**कावचिक** न० कवचिनां समूहः "ठञ् कवचिनश्च" पा० ठञ् 'इनोलोपः। वर्म्मधारिणां समूहे।

**कावट** पु० कर्वट+पृषो०। कर्वटे हला०।

**कावषेय** पु० यजुर्वेदशाखान्तर्गते तुराख्ये ऋषिभेदे। "कावषेयात्तु कावषेयः" शत० १०,६,५,८, तुरोह कावषेयः कारोत्यां देवेभ्योऽग्निं चिकीये" तत्रैव ८,५,२,१५,

**कावाद** पु० कुत्सितईषद्वा वादः कोः का। वाक्कलहे शब्दचि०। [शैवाले हलादिच्छत्रे त्रिका०।

**कावार** न० कं जलमावृणोति आ+वृ—अण् उप०स०।

**कावी** स्त्री कवेरियं ष्यञ् ततः शार्ङ्गर० स्त्रियां ङीन् यलोपः। कविसम्बन्धिन्यास् स्त्रियाम्।

**कावृक** पुंस्त्री कुत्सितः ईषद्वा वृक इव। १ कुक्कुटे २चक्रवाके ३पीतवर्णमस्तकपक्षिभेदे च मेदि०तेषां वृकतुल्यैकपक्षियुक्तत्वात् तथात्वम्। स्त्रियां जातित्वात् ङीष्।

**कावेर** न० कस्य सूर्य्यस्येव ईषत्वेरमङ्गमस्य। १ कुङ्कुमे जटा०। तस्य शिखाभिः सूर्य्यतुल्यरक्तत्वात् तथात्वम्।

**कावेरी** स्त्री कस्य जलस्य वेरं शरीरं तस्येदमित्यण् ङीप्। १सरिद्भेदे। कुत्सितमपवित्रं वेरं यस्याः स्वाङ्गत्वात् ङीष्। २वेश्यायाम् ५क०। ३ हरिद्रायाम्। "दृषद्वती च कावेरी वङ्कुर्मन्दाकिनी तथा" भा०आनु०१६५अ०। "भारतीसुप्रयोगा च कावेरी मुर्म्मुरा तथा" भा०व०२२१। "चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला-वैहा पसी कावेरी वेत्रेत्यादि भाग० ५,१९,१८, भारतवर्षनदीकथने। सा च सह्याद्रेः मलयाद्रेश्च सानुसन्निकृष्टस्था तदेतत् रघौ वर्णितम् यथा

"गृहीतप्रतिमुक्तस्य स धर्म्मविजयी नृपः। श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्। ततो वेलातटेनैव फल-